दिनाङ्क :- 24.08.2025

प्रातः - 06:55

<u>प्रधानमन्त्री/अर्थव्यवस्था</u>

प्रधानमन्त्री नरेन्द्र-मोदी उक्तवान् यत् भारतं विश्वस्य द्रुततरं वर्धमाना प्रमुखा अर्थव्यवस्था अस्ति, अपि च शीघ्रमेव वैश्विकस्तरे तृतीयां बृहत्तमीम् अर्थव्यवस्थां भवितुं सज्जम् अस्ति। दिल्ल्याम् एकेन निज-संचारगृहेण आयोजिते मञ्चे श्रीमोदी सबलं प्रावोचत् यत् भारतं स्वस्य सामर्थ्येन सौविध्येन च विश्वस्य कृते आशायाः किरणम् इव वर्तते।

<u>प्रधानमन्त्री/गहनान्तरिक्षम्</u>

प्रधानमन्त्री नरेन्द्र-मोदी वैज्ञानिकान् गहनान्तरिक्षस्य अन्वेषणाय सज्जान् भवितुम् आहूतवान्, यतः एतेषु अज्ञात-प्रदेशेषु मानवतायाः भविष्याय महत्त्वपूर्णानि रहस्यानि विद्यन्ते। गतदिने राष्ट्रियान्तरिक्ष-दिवसस्य अवसरे एकस्मिन् दृश्य-श्रव्य-सन्देशे श्रीमोदी अवदत् यत् भारतं पूर्वमेव चन्द्रं मङ्गलं च प्राप्तवत् अस्ति। सम्प्रति अन्तरिक्षस्य गहनानां क्षेत्राणाम् अन्वेषणस्य कालः सम्प्राप्तः। प्रधानमन्त्रिणा उक्तं यत् भारतम् सेमी-क्रायोजेनिक्यन्त्र-विद्युत्प्रणोदनेत्यादि-सफल-प्राविधिकीषु द्रुतगत्या प्रगतिं कुर्वदस्ति, अपि च शीघ्रमेव गगन-यानाभियानस्य अपि आरम्भं करिष्यति। आगामिनि काले भारतं स्वकीयम् अन्तरिक्ष-स्थानकं निर्मास्यतीति प्रधानमन्त्री दृढरूपेण अवोचत्। श्रीमोदी अवदत् यत् अल्पावधौ एव राष्ट्रियान्तरिक्ष-दिवसः यूनां मध्ये उत्साहस्य आकर्षणस्य च कश्चन अवसरः अभवत्। सः अवदत् यत् अन्तरिक्षक्षेत्रं पौनःपुन्येन नूतनं लक्ष्यम् अङ्गीकरोति, अपि च विगतेषु एकादशवर्षेषु सर्वकारेण अन्तरिक्षक्षेत्रीयाः बहवः परिष्काराः कृताः सन्ति। श्रीमोदी अवोचत् यत् भारते स्पेस्-टेक् अपि शासनस्य भागः भवति। तेन उक्तं यत् अद्यत्वे अन्तरिक्षक्षेत्रे भारतस्य प्रगतिः सामान्यनागरिकाणां जीवनं सुलभतरं करोति इति।

जयशङ्करः

विदेशमन्त्री डॉ. एस्.जयशङ्करः अवदत् यत् भारतामेरिकादेशयोः व्यापारवार्ता साम्प्रतमपि प्रवर्तते। तेनोक्तं यत् सर्वकारः देशस्य कृषकाणां लघूद्यमिनां च हितरक्षणाय प्रतिबद्धोऽस्ति। ह्य: नवदिल्ल्यां पञ्चविंशत्यधिक-द्विसहस्रतमम् ईटी-वर्ल्ड-लीडर्स्-फोरम्-इत्याख्यं कार्यक्रमं सम्बोधयन् असौ अवदत् यत् भारतम् अमेरिकादेशेन साकं स्वसीम्नां विषये सुस्पष्टमस्ति अपि च स्वहितायैव निर्णयं ग्रहीष्यति । तैलायात-प्रतिबन्धविषये मन्त्रिणा प्रोक्तं यत् भारतं लक्ष्यीकृत्य उपस्थापित-तर्कः चीनदेशोपरि नान्वेति। सः सबलं उक्तवान् यत् गृहीतनिर्णयाः राष्ट्रहितायैव भविष्यन्तीति।

ऋतुः

भारतीयर्तुविज्ञान-विभागस्य अनुसारि, श्वः पर्यन्तं राजधान्यां दिल्ल्यां कतिपयेषु भागेषु वृष्टि: अतिवृष्टिः वा भविष्यति। अद्य पूर्वीय-राजस्थाने घनासार-वृष्टेः संभावनास्ति। विभागेन सूचितं यत् आगामिषु पञ्चसु दिवसेषु देशस्य पूर्वीय-मध्य-भागेषु कतिपय-स्थलेषु मध्यमस्तरीया वृष्टिः भविष्यतीति संभाव्यते।

संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

लक्ष्यभेद-स्पर्धा

कजाकिस्तान-देशस्य शिमकेंट-नगरे षोडशतम्यां लक्ष्यभेद-प्रतिस्पर्धायां भारतेन एयर-राइफल-संयुक्तदल-स्पर्धायां स्वर्णपदकं विजितम्।